॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ३९

तथा स्म तेषां वसतामृक्षवानररक्षसाम् ।
राघवस्तु महातेजाः सुग्रीवमिदमब्रवीत् ॥ १॥

गम्यतां सौम्य किष्किन्धां दुराधर्षं सुरासुरैः ।
पालयस्व सहामात्यै राज्यं निहतकण्टकम् ॥ २॥

अङ्गदं च महाबाहो प्रीत्या परमयान्वितः ।
पश्य त्वं हनुमन्तं च नलं च सुमहाबलम् ॥ ३॥

सुषेणं श्वशुरं शूरं तारं च बलिनां वरम् ।
कुमुदं चैव दुर्धर्षं नीलं च सुमहाबलम् ॥ ४॥

वीरं शतबलिं चैव मैन्दं द्विविदमेव च ।
गजं गवाक्षं गवयं शरभं च महाबलम् ॥ ५॥

ऋक्षराजं च दुर्धर्षं जाम्बवन्तं महाबलम् ।
पश्य प्रीतिसमायुक्तो गन्धमादनमेव च ॥ ६॥

ये चान्ये सुमहात्मानो मदर्थे त्यक्तजीविताः ।
पश्य त्वं प्रीतिसंयुक्तो मा चैषां विप्रियं कृथाः ॥ ७॥

एवमुक्त्वा च सुग्रीवं प्रशस्य च पुनः पुनः ।
विभीषणमथोवाच रामो मधुरया गिरा ॥ ८॥

तङ्कां प्रशाधि धर्मेण संमतो ह्यसि पार्थिव ।
पुरस्य राक्षसानां च भ्रातुर्वैश्रवणस्य च ॥ ९॥

मा च बुद्धिमधर्मे त्वं कुर्या राजन्कथं चन ।
बुद्धिमन्तो हि राजानो ध्रुवमश्नन्ति मेदिनीम् ॥ १०॥

अहं च नित्यशो राजन्सुग्रीवसहितस्त्वया ।
स्मर्तव्यः परया प्रीत्या गच्छ त्वं विगतज्वरः ॥ ११॥

रामस्य भाषितं श्रुत्वा ऋष्कवानरराक्षसाः ।
साधु साध्विति काकुत्स्थं प्रशशंसुः पुनः पुनः ॥ १२॥

तव बुद्धिर्महाबाहो वीर्यमद्भुतमेव च ।
माधुर्यं परमं राम स्वयम्भोरिव नित्यदा ॥ १३॥

तेषामेवं ब्रुवाणानां वानराणां च रक्षसाम् ।
हनूमत्प्रणतो भूत्वा राघवं वाक्यमब्रवीत् ॥ १४॥

स्नेहो मे परमो राजंस्त्वयि नित्यं प्रतिष्ठितः ।
भक्तिश्च नियता वीर भावो नान्यत्र गच्छति ॥ १५॥

यावद्रामकथां वीर श्रोष्येऽहं पृथिवीतले ।
तावच्छरीरे वत्स्यन्तु मम प्राणा न संशयः ॥ १६॥

एवं ब्रुवाणं राजेन्द्रो हनूमन्तमथासनात् ।
उत्थाय च परिष्वज्य वाक्यमेतदुवाच ह ॥ १७॥

एवमेतत्कपिश्रेष्ठ भविता नात्र संशयः ।
लोका हि यावत्स्थास्यन्ति तावत्स्थास्यति मे कथा ॥ १८॥

चरिष्यति कथा यावल्लोकानेषा हि मामिका ।
तावच्छरीरे वत्स्यन्ति प्राणास्तव न संशयः ॥ १९॥

ततोऽस्य हारं चन्द्राभं मुच्य कण्ठात्स राघवः ।
वैदूर्यतरलं स्नेहादाबबन्धे हनूमति ॥ २०॥

तेनोरसि निबद्धेन हारेण स महाकपिः ।
रराज हेमशैलेन्द्रश्चन्द्रेणाक्रान्तमस्तकः ॥ २१॥

श्रुत्वा तु राघवस्यैतदुत्थायोत्थाय वानराः ।
प्रणम्य शिरसा पादौ प्रजग्मुस्ते महाबलाः ॥ २२॥

सुग्रीवश्चैव रामेण परिष्वक्तो महाभुजः ।
विभीषणश्च धर्मात्मा निरन्तरमुरोगतः ॥ २३॥

सर्वे च ते बाष्पगलाः साश्रुनेत्रा विचेतसः ।
संमूढा इव दुःखेन त्यजन्ते राघवं तदा ॥ २४॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com